**সংকষ্ট নাশন গণেশ স্তোত্রং**
**নারদ উৱাচ।**
প্রণম্য শিরসা দেৱং গৌরীপুত্রং ৱিনাযকম্ ।
ভক্তাৱাসং স্মরেন্নিত্যং আযুষ্কামার্থসিদ্ধযে ॥ 1 ॥
প্রথমং ৱক্রতুংডং চ একদংতং দ্ৱিতীযকম্ ।
তৃতীযং কৃষ্ণপিংগাক্ষং গজৱক্ত্রং চতুর্থকম্ ॥ 2 ॥
লংবোদরং পংচমং চ ষষ্ঠং ৱিকটমেৱ চ ।
সপ্তমং ৱিঘ্নরাজং চ ধূম্রৱর্ণং তথাষ্টকম্ ॥ 3 ॥
নৱমং বালচংদ্রং চ দশমং তু ৱিনাযকম্ ।
একাদশং গণপতিং দ্ৱাদশং তু গজাননম্ ॥ 4 ॥
দ্ৱাদশৈতানি নামানি ত্রিসংধ্যং যঃ পঠেন্নরঃ ।
ন চ ৱিঘ্নভযং তস্য সর্ৱসিদ্ধিকরং পরম্ ॥ 5 ॥
ৱিদ্যার্থী লভতে ৱিদ্যাং ধনার্থী লভতে ধনম্ ।
পুত্রার্থী লভতে পুত্রান্মোক্ষার্থী লভতে গতিম্ ॥ 6 ॥
জপেদ্গণপতিস্তোত্রং ষড্ভির্মাসৈঃ ফলং লভেত্ ।
সংৱত্সরেণ সিদ্ধিং চ লভতে নাত্র সংশযঃ ॥ 7 ॥
অষ্টভ্যো ব্রাহ্মণেভ্যশ্চ লিখিত্ৱা যঃ সমর্পযেত্ ।
তস্য ৱিদ্যা ভৱেত্সর্ৱা গণেশস্য প্রসাদতঃ ॥ 8 ॥
ইতি শ্রী নারদ পুরাণে সংকষ্ট নাশন গণেশ স্তোত্রং পরিপূর্ণ ।